**53923** Seat No.______

**Third Year B. A. Examination**

April / May – 2003

**Sanskrit : Paper – VII**

(१) वेदान्तसारः । (२) सांख्यकारिका ।

Time : **3** Hours] [Total Marks : **70**

**સૂચના :** પ્રશ્નપત્રમાં છાપેલો પ્રશ્નક્રમાંક જ ઉત્તરવહીના હાંસિયામાં લખવો.

**Instruction :** Write the same question-number in the margin of the answer-book as it is printed on the question paper.

१ નીચેનામાંથી કોઈ પણ **બે** ગદ્યખંડોનું હાર્દ, સંદર્ભ આપી સમજાવો : १४

**1** Explain clearly, giving context the purport of any **two** of the following passages : **14**

(१) तत्रानुबन्धो नामाधिकारीविषयसम्बन्धप्रयोजनानि । अधिकारी तु विधिवदधीतवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता ।

(२) इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना । एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनियन्तृत्वादि गुणकर्मव्यक्तमन्तर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते सकलज्ञानावभासकत्वात् 'यः सर्वज्ञः सर्ववित्' इति श्रुतेः ।

ईश्वरस्येयं समष्टिरखिलकारणत्वात् कारणशरीरमानन्दप्रचुरत्वा–त्कोशवदाच्छादकत्वाच्चानन्दमयकोशः सर्वोपरमत्वात् सुषुप्तिरत एव स्थूलसूक्ष्मप्रपञ्चलयस्थानमिति चोच्यते ।

(३) इदानीं प्रत्यगात्मनीदमिदमयमयमारोपयतीति विशेषतः उच्यते ।

अतिप्राकृतस्तु ''आत्मा वै जायते पुत्रः'' इत्यादि श्रुतेः स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात्पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति ।

चार्वाकस्तु 'स वा एष पुरुषोऽन्नरसमय' इत्यादि श्रुतेः । प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात्स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति ।

(४) श्रवणं नाम षड्विधलिङ्गैरशेषवेदान्तानामद्वितीये वस्तुनि तात्पर्यावधारणम् । लिङ्गानि तूपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्त्याख्यानि ।

तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपपादनमुपक्रमोपसंहारौ । यथा छान्दोग्ये षष्ठाध्याये प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः ''एकमेवाद्वितीयम्'' इत्यादौ ''ऐतदात्म्यमिदं सर्वम्'' इत्यन्ते च प्रतिपादनम् ।

प्रकरणप्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनः पुन्येन प्रतिपादनमभ्यासः । यथा तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनम् ।

૨ ''अपवाद'' વિષે સવિસ્તર નોંધ લખો. **૧૪**

**2** Write detailed notes on ''अपवादः''. **14**

**અથવા / OR**

૨ ''अनुबन्धचतुष्टयः'' વિષે સવિસ્તર નોંધ લખો. **૧૪**

**2** Write detailed notes on ''अनुबन्धचतुष्टयः''. **14**

૩ (અ) નીચેનામાંથી ગમે તે **એક** ઉપર ટૂંકનોંધ લખો : **૭**

**3** (a) Write short note on any **one** of the following : **7**

(१) आवरण–विक्षेप (शक्तिद्वयम्) ।

(२) जीवनमुक्तलक्षणानि ।

(३) साधनचतुष्टयः ।

૩ (બ) નીચેનામાંથી ગમે તે **એક** ઉપર ટૂંકનોંધ લખો : **૭**

**3** (b) Write short note on any **one** of the following : **7**

(१) पुरुषबहुत्वम् ।

(२) लिङ्गशरीरम् ।

(३) त्रिविधं प्रमाणमिष्टम् ।

૪ નીચેનામાંથી ગમે તે **ત્રણ** કારિકાઓ સમજાવો : **૧૪**

**4** Explain any **three** Kārikās of the following : **14**

(१) दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥

(२) असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ॥

(३) पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पंग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥

(४) रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।
पुरुषस्य तथाऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥

(५) सम्यग्ज्ञानाधिगमात् धर्मादीनामकारणप्राप्तौ ।
तिष्ठति संस्कारवशात् चक्रभ्रमिवदधृतशरीरः ॥

(६) वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥

૫ "सांख्य" શબ્દના વિવિધ અર્થો આપો અને સાંખ્યદર્શનના ગ્રંથો વિષે સવિસ્તર નોંધ લખો. **૧૪**

**5** Give the different meanings of the word "सांख्य" and write detailed notes on the books of सांख्यदर्शन. **14**

**અથવા / OR**

૫ સાંખ્યકારિકાને આધારે प्रकृतिના અસ્તિત્વને સિદ્ધ કરતી દલીલો આપી તેના સ્વરૂપ અને કાર્યોનું વર્ણન કરો. **૧૪**

**5** Give the arguments establishing the existence of प्रकृति and describe it's nature and functions on the basis of सांख्यकारिका. **14**

---